# Achyutashtakam 1

# અચ્યુતાષ્ટકમ્ ૧

## Document Information

Text title : achyutAShTakaM 1

File name : achyuta8.itx

Category : aShTaka, vishhnu, krishna, shankarAchArya, vishnu

Location : doc_vishhnu

Author : Shankaracharya

Transliterated by : Girish Beehary

Proofread by : Girish Beehary, NA

Latest update : Mar 29, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 3, 2020

*sanskritdocuments.org*

# અચ્યુતાષ્ટકમ્ ૧

અચ્યુતં કેશવં રામનારાયણં કૃષ્ણદામોદરં વાસુદેવં હરિમ્ ।
શ્રીધરં માધવં ગોપિકાવલ્લભં જાનકીનાયકં રામચન્દ્રં ભજે ॥ ૧॥

અચ્યુતં કેશવં સત્યભામાધવં માધવં શ્રીધરં રાધિકારાધિતમ્ ।
ઇન્દિરામન્દિરં ચેતસા સુન્દરં દેવકીનન્દનં નન્દનં સન્દધે ॥ ૨॥

વિષ્ણવે જિષ્ણવે શઙ્ખિને ચક્રિણે રુક્મિણિર઼ાગિણે જાનકીજાનયે ।
વલ્લવીવલ્લભાયાઽર્ચિતાયાત્મને કંસવિધ્વંસિને વંશિને તે નમઃ ॥ ૩॥

કૃષ્ણ ગોવિન્દ હે રામ નારાયણ શ્રીપતે વાસુદેવાજિત શ્રીનિધે ।
અચ્યુતાનન્ત હે માધવાધોક્ષજ દ્વારકાનાયક દ્રૌપદીરક્ષક ॥ ૪॥

રાક્ષસક્ષોભિતઃ સીતયા શોભિતો દણ્ડકારણ્યભૂપુણ્યતાકારણઃ ।
લક્ષ્મણેનાન્વિતો વાનરૈઃ સેવિતોઽગસ્ત્યસમ્પૂજિતો રાઘવઃ પાતુ મામ્ ॥ ૫॥

ધેનુકારિષ્ટકોઽનિષ્ટકૃદ્દ્વેષિણાં કેશિહા કંસહૃદ્વંશિકાવાદકઃ । var દ્વેષિહા
પૂતનાકોપકઃ સૂરજાખેલનો બાલગોપાલકઃ પાતુ મામ્ સર્વદા ॥ ૬॥

વિદ્યુદુદ્યોતવત્પ્રસ્ફુરદ્વાસસં પ્રાવૃડમ્ભોદવત્પ્રોલ્લસદ્વિગ્રહમ્ । var વિદ્યુદુદ્યોતવાન્
વન્યયા માલયા શોભિતોરઃસ્થલં લોહિતાઙ્ઘ્રિદ્વયં વારિજાક્ષં ભજે ॥ ૭॥

કુઞ્ચિતૈઃ કુન્તલૈર્ભ્રાજમાનાનનં રત્નમૌલિં લસત્કુણ્ડલં ગણ્ડયોઃ ।
હારકેયૂરકં કઙ્કણપ્રોજ્જ્વલં કિઙ્કિણીમઞ્જુલં શ્યામલં તં ભજે ॥ ૮॥

અચ્યુતસ્યાષ્ટકં યઃ પઠેદિષ્ટદં પ્રેમતઃ પ્રત્યહં પૂરુષઃ સસ્પૃહમ્ ।
વૃત્તતઃ સુન્દરં કર્તૃ વિશ્વમ્ભરસ્તસ્ય વશ્યો હરિર્જાયતે સત્વરમ્ ॥ ૯॥

॥ ઇતિ શ્રીશઙ્કરાચાર્યવિરચિતમચ્યુતાષ્ટકં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Girish Beehary

*Achyutashtakam 1*

pdf was typeset on November 3, 2020

Please send corrections to *sanskrit@cheerful.com*